# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – -२०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य-१** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – स्वामिनारायणवेदान्तः(J)** | **सत्रम् – २** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – भगवद्गीता – गोपालानन्दभाष्यसहिता (७-१२ अध्यायाः)** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**

**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु प्रश्नेषु कयोश्चित् द्वयोरेव उत्तरं लिखत्।**

१ "सर्वैः अपि शब्दैः परमात्मनः एव अभिधानम्" इति समर्थयत।

२ "चतुर्विधा भजन्ते माम्" इत्यत्र प्रतिपादितमनुष्याणां चातुर्विध्यं विलिख्य तेषु ज्ञानिनः श्रैष्ठ्यञ्च ब्रूत।

३ लौकिकानां पुरुषाणाम् आराधनप्रकारं तदाराधनफलञ्च प्रतिपादयत।

४ ब्रह्मलोकपर्यन्तानां लोकानां तदन्तर्वर्तिनाञ्च भगत्संकल्पकृतामुत्पत्तिविनाशकाल-व्यवस्थां निरूपयत।

**प्रश्नः २ सप्तमाध्याये भगवता श्रीकृष्णेन स्वविषयकं ज्ञानं कथम् उपपादितम्? विवेचयत।**

**प्रश्नः ३ श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य सारभागम् उल्लिखत।**

**प्रश्नः ४ भगवता श्रीकृष्णेन नवमाध्याये स्वस्य अचिन्त्यमहिमानं कथमुपपादितम्? विमृशत।**

**प्रश्नः ५ श्रीमद्भगवद्गीतायाः नवमाध्यायस्य सारांशं यथाभाष्यं प्रतिपादयत।**

**प्रश्नः ६ अधोलिखितेषु प्रश्नेषु कयोश्चित् द्वयोरेव उत्तरं लिखत्।**

१ भगवदैश्वर्यं सविस्तरेण श्रोतुकामेन अर्जुनेन भगवन्तं श्रीकृष्णमुद्दिश्य का प्रार्थना कृता? निरूपयत।

२ भगवद्भक्तानां भजनप्रकारमुक्त्वा तदुपरिभगवत्कृपाप्रसादमपि यथाभाष्यं विवृणुत।

३ दशमाध्यायस्य आरम्भे स्वमाहात्म्यं कथयितुं प्रीतेन भगवता अर्जुनमुद्दिश्य किमुक्तम्? विमृशत।

४ दशमाध्यायस्य अन्ते स्वविभूतिकथनसमाप्तिं कुर्वता भगवता किमुक्तम्? स्पष्टयत।

**प्रश्नः ७ भाष्योक्तदिशा दशमाध्याये प्रतिपादिताः भगवद्विभूतीः विशदयत।**

**प्रश्नः ८ श्रीमद्भगवद्गीतायाः दशमाध्यायस्य सारभागं विवेचयत।**

**प्रश्नः ९ एकादशाऽध्यायानुसारं भगवतः विश्वरूपस्य यथाग्रन्थं निरूपणं कुरुत।**

**प्रश्नः१० श्रीमद्भगवद्गीतायाः द्वादशाध्यायस्य सारभागं संगृह्णीत।**

**प्रश्नः११ अधोलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानामेव लघूत्तराणि देयानि।**

१ श्रीमद्भगवद्गीतायाः सप्तमाध्यायस्य नाम किम्?

२ मायायाः अर्थः किः?

३ अर्थार्थी कः?

४ इदं संपूर्णं जगत् परमात्मनि कथं प्रोतम्?

५ भक्तेः निर्वचनं ब्रूत।

६ श्रीमद्भगवद्गीतायाः अष्टमाध्याये कति श्लोकाः सन्ति?

७ "अक्षरः" इति शब्दस्यार्थं लिखत।

८ इदं जगत् केन व्याप्तम्?

९ श्रीमद्भगवद्गीतायाः नवमाध्यायस्य नाम किम्?

१० के भगवतः पुरुषोत्तमस्य प्रभावं न जानन्ति?

११ श्रीमद्भगवद्गीतायाः दशमाध्याये कति श्लोकाः वर्तन्ते?

१२ भगवान् श्रीकृष्णः अर्जुनाय दिव्यं चक्षुः किमर्थं ददाति?

१३ अर्जुनः देवदेवस्य दिव्यशरीरे किमपश्यत्?

१४ देहवद्भिः किं दुःखेन अवाप्यते?

१५ श्रीमद्भगवद्गीतायाः द्वादशाध्यायस्य नाम किम्?

***